# संस्कृतवार्ता:

21.08.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- उपराष्ट्रपतिः जगदीप धनखडः उक्तवान् यत् पुनरुत्थानशीलः आफ्रिका-देशः, उदीयमानं भारतं च दक्षिण-दक्षिणसहयोगाय प्रोत्साहनं दातुं शक्नोति
- प्रधानमन्त्री नरेन्द्रमोदी अद्य पोलैण्ड-यूक्रेन्-देशयोः त्रिदिवसीयां यात्रां समारभत् यात्रावधौ अद्य सायं एकस्मिन् सामुदायिक-कार्यक्रमे भागं गृहीत्वा तत्रत्य भारतीय-समुदायेन सह संवादं च विधास्यति।
- अद्य नवदिल्ल्यां अन्तर्जालमाध्यमेन चरमपन्थप्रचारेति विषयम् अधिकृत्य द्विदिवसीयं यूरोपीयसङ्घ-भारत-ट्रैक्-1.5 इति सम्मेलनम् समारब्धम् ।
- पाकिस्तानात् शिया-यातृन् नीत्वा इराक-देशं प्रति गम्यमानं बसयानं मध्यइराक-क्षेत्रे गतरात्रौ दुर्घटनाग्रस्तं जातम्, यस्मिन् न्यूनातिन्यूनं अष्टविंशतिः जनाः मृताः ।
- माल्दीवस्य उत्तरभागेषु प्रचण्डवृष्ट्या व्यापक-जल-प्लावनं जातम् ।

<u>उपराष्ट्रपतिः-अफ्रीका</u>

उपराष्ट्रपतिः जगदीप धनखडः उक्तवान् यत् पुनरुत्थानशीलः आफ्रिका-देशः, उदीयमानं भारतं च दक्षिण-दक्षिणसहयोगाय प्रोत्साहनं दातुं शक्नोति इति। नवदिल्ल्याम् अद्य नवदशतमं सी. आई. आई.-भारत-आफ्रिका-व्यापार-सम्मेलनम् इत्यस्य उद्घाटन-सत्रं सम्बोधयन् श्रीधनखडः अवदत् यत् स्वच्छ-प्रौद्योगिकी, जलवायु-अनुकूल-कृषिः, समुद्र-सुरक्षा, सम्पर्कः, नील-अर्थव्यवस्था इत्यादिषु क्षेत्रेषु भारत-आफ्रिका-सहयोगस्य विविधावसराः सन्ति इति। सः अवदत् यत्, भारतं आफ्रिका-देशस्य चतुर्थः बृहत्तमः वाणिज्यसहभागिः अस्ति सहैव बृहत्तमलोकतन्त्रस्य , गतिशीलदेशस्य च रूपेण, भारतेन आफ्रिका-देशेन सह दृढसम्बन्धाः विनिर्मिताः सन्ति । धनखडः अवदत् यत्, अस्य भारत-आफ्रिका-व्यापार-सम्मेलनस्य विषयः 'एकस्य भविष्यस्य निर्माणम्' इति भारतीयसभ्यतायाः लोकाचारे गभीरतया सन्निहितः अस्ति इति। धनखडः अवदत् यत्, एतत्

सम्मेलनम् एकत्रीभवितुं, समकालीनानां प्रासङ्गिकानां च विषयाणां विषये चिन्तनं कर्तुं, सर्वेषाम् कल्याणार्थं सामान्यस्य भविष्यस्य निर्माणार्थं च प्रयत्नानां समन्वयं कर्तुं अवसरः यच्छति । जिम्बाब्वे-देशस्य उपराष्ट्रपतिः डा. C.G.D.N. चिवेङ्गा अवदत् यत्, भारत-आफ्रिका-सम्बन्धान् प्रगाढं कर्तुं सुदृढं दृष्टिकोणं महत्वपूर्णम् अस्ति इति। मारिषस्-देशस्य उपाध्यक्षा मैरी सिरिल एडी बोइसेज़ोन अवदत् यत्, मारिषस-देशः भारतस्य यू. पी. आई. व्यवस्थां स्वीकृत्य प्रथमः आफ़्रीकीयः देशः अस्ति । लाईबेरिया-देशस्य उपराष्ट्रपतिः जेरेमिया कपान् कौङ्ग् अवदत् यत्, लाईबेरिया-देशः विशेषतः जलविद्युत्-परियोजनायां अन्येषु विविधेषु उपक्रमेषु च निवेशाय मुक्तः सज्जः च अस्ति। "गाम्बियादेशस्य राष्ट्रपतिः मुहम्मद B.S." जैलो अवदत् यत्, गाम्बिया-देशः व्यापारार्थं मुक्तः अस्ति, नूतन-व्यापार-अवसरान् प्रवर्धयितुं, मिलित्वा प्रभावपूर्ण-संयुक्त-उद्यमस्य निर्माणाय च उत्सुकः अस्ति।

प्रधानमन्त्री-पोलैण्ड

प्रधानमन्त्री नरेन्द्रमोदी अद्य पोलैण्ड-यूक्रेन्-देशयोः त्रिदिवसीयां यात्रां समारभत् । अद्य सायङ्काले पोलैण्ड-देशस्य राजधान्यां वारसा-नगरे मोदी-वर्यस्य औपचारिकं स्वागतम् भविष्यति। सः जाम-साहेब-नवानगर-स्मारके, मोण्टे-कैसिनो-युद्धस्य-स्मारके, कोल्हापुर-स्मारके च पुष्पमालां समर्पयिष्यति। पश्चात् सः वार्सा-नगरे एकस्मिन् सामुदायिक-कार्यक्रमे भागं गृहीत्वा तत्रत्य भारतीय-समुदायेन सह संवादं करिष्यति।

भारतयूरोपसम्मेलनम्

अद्य नवदिल्ल्यां द्विदिवसीयं यूरोपीयसङ्घ-भारत-ट्रैक्-1.5 इति सम्मेलनम् समारब्धम्, यस्मिन् अन्तर्जालमाध्यमैः चरमपन्थिभिः समुत्पादितं सङ्कटम् उद्दिश्य अपि च आतङ्क्यभिनेतृभिः अन्तर्जालपटलेषु समुत्पादितानां विभीषिकानां च विषये संयुक्तरूपेण प्रतीकारस्य उपायान् अन्वेष्टुं चर्चा क्रियते । अद्य नवदिल्ल्यां यूरोपीय-सङ्घ-भारत-सम्मेलने जनसमूहं सम्बोधयन्, भारते यूरोपीय-सङ्घस्य राजदूतः हर्वे डेल्फिन्, भयोत्पादनेन उद्भूतानां समस्यानां निवारणार्थं ,अन्तर्जालमाध्यमेन चरमपन्थ-प्रचारं विरुध्य संयुक्त-क्षेत्रीय-प्रयासस्य आह्वानम् अकरोत् । भारतस्य पूर्वविदेशसचिवः जवाहरलाल-नेहरूविश्वविद्यालयस्य वर्तमानः कुलपतिः च डा. कंवल-सिब्बलः अवदत् यत् अन्तर्जालमाध्यमेन भयोत्पादक-सामग्रीणां विषये द्विदिवसीय-चर्चा सारभूता भविष्यतीति । सः इदमपि अकथयत् यत् अस्याः समस्यायाः निवारणाय अन्ताराष्ट्रिय-

सहयोगस्य आवश्यकता वर्तते इति। यूरोपीयसङ्घः वैश्विक-आतङ्कवाद-निरोध-परिषदेन, विदेशमन्त्रालयेन च सम्मिल्य आन्तर्जाल-माध्यमेन आतङ्कोत्पादक-विषयवस्तूनां निवारणविषये अस्य सम्मेलनस्य आयोजनम् कृतम् । अनेन सम्मेलनेन दक्षिण-एशिया-यूरोप्-देशयोः विशेषज्ञाः, नीतिनिर्मातारः, शिक्षाविदाः, विधि-प्रवर्तन-अधिकारिणः च एकत्री-भविष्यन्ति, ये डिजिटल्-उग्रवादं विरुद्ध्य युद्धे अग्रे सन्ति।

<u>पाकिस्तान-ईरान</u>

पाकिस्तानात् शिया-यातॄन् नीत्वा इराक-देशं प्रति गम्यमानं बसयानं मध्यइराक-क्षेत्रे गतरात्रौ दुर्घटनाग्रस्तं जातम्, यस्मिन् न्यूनातिन्यूनं अष्टविंशतिः जनाः मृताः । बसयाने एकपञ्चाशत् तीर्थयात्रिणः आसन् । इमाम-हुसैनस्य बलिदानस्य चत्वारिंशत्-तमस्य दिवसस्य संस्मरणावसरे एकस्मिन् महत्त्वपूर्णे शिया-उत्सवे अरबाईन इत्यत्र गच्छन्ति स्म। अद्य अन्यायां एकस्यां घटनायां सिस्तान्-बलुचिस्तान-प्रान्तयोः बसयान-दुर्घटनायां षट् जनाः मृताः अष्टादश जनाः च व्रणिताः अभवन् ।

<u>प्रधानमन्त्री-आरबीआई</u>

प्रधानमन्त्री नरेन्द्रमोदी आर्. बि.आई. इत्यस्य निदेशकाय शक्तिकान्त-दासाय <u>ग्लोबल् फैनान्स् सेण्ट्रल् बैंकर्-रिपोर्ट्-काड्र्स् 2024</u> इत्यस्मिन् निरन्तरं द्वितीयवारं <u>ए + रेटिंग्</u> इत्येतत् प्राप्तुं वर्धापनानि अयच्छत्। सामाजिक-सञ्चार-पटले श्रीमोदी अकथयत् यत् एषा आर्. बी. आई. इत्यत्र नेतृत्वं, आर्थिकवृद्धिं स्थिरतां च सुनिश्चेतुं शक्तिकान्तदासस्य तस्य कार्यस्य च मान्यता अस्ति इति।

<u>जम्मू-कश्मीरः-आतङ्किनः</u>

जम्मू-कश्मीर्-प्रदेशे, सीमावर्ति-जनपदे राजौरी-मण्डले सुरक्षासैनिकाः भूगतस्य आतङ्किनः गुप्तस्थानस्य रहस्योद्घाटनं कृतवन्तः। सीमावर्ति-जनपदस्य दरहाल-क्षेत्रे सागरावत्-वनक्षेत्रे आरक्षकाणां, सेनायाः, सी. आर्. पी. एफ्. इत्यस्य च संयुक्तदलस्य परिवेष्टन-अन्वेषण-कार्यकाले ह्यः एतत् गुप्तस्थानम् अनावृतम्। अन्वेषणस्य आरम्भात् पूर्वं गुप्तस्थानस्य उपयोगेन आतङ्किनः

पलायनं कर्तुं समर्थाः अभवन् अनेन अभियानस्य समये कोऽपि न गृहीतः। उधमपुर-जनपदस्य बसन्तगढस्य बलोथा-क्षेत्रे सुरक्षासैनिकैः गुहा-सदृश गुप्तस्थानम् अपि अनावृतम् । वसन्तगढनगरे सोमवासरे आतङ्कवादिभिः सी. आर्. पी. एफ्. इत्यस्य सैनिकोपरि आरक्षकाणां संयुक्त-अन्वेषणदलस्य उपरि च गोलिकाप्रहारः कृतः, येन अर्धसैनिकबलस्य निरीक्षक-पदस्य अधिकारी मृत्युमुपगतः।

<u>अन्तरिक्षदिवसः</u>

अगस्त मासस्य त्रयोविंशति दिनाङ्के देशे प्रथमः राष्ट्रियः अन्तरिक्षदिवसः आचर्यते। अस्मिन् वर्षे अस्य महोत्सवस्य विषयः अस्ति <u>चन्द्रस्पर्शनेन जीवनस्पर्शनम् – भारतस्य अन्तरिक्षगाथा</u> इति। राष्ट्रपति द्रौपदी मुर्मू नवदिल्लीस्थे भारतमण्डपमे आयोजितस्य मुख्यकार्यक्रमस्य उद्घाटनं करिष्यति। अन्तरिक्षराज्यमन्त्री डॉ. जितेन्द्रसिंहः अद्य वार्ताहर-सम्मेलनं सम्बोधयन् अवदत् यत् गतवर्षे अस्मिन् दिने चन्द्रयान-तृतीयस्य प्रक्षेपण-समये विक्रम-लैण्डर इत्यस्य चन्द्रमसि सुरक्षितं सरलं च अवरोहणं जातम्। तेनोदीरितं यत् भारतं चन्द्रमसि अवतीर्य चतुर्थः देशः सञ्जातः, चन्द्रमसः दक्षिणध्रुव-प्रदेशस्य समीपे अवतीर्य प्रथमः देशः च अभवत् ।

<u>माल्दीवः-जलाप्लावनम्</u>

माल्दीवस्य उत्तरभागेषु प्रचण्डवृष्ट्या व्यापक-जल-प्लावनं जातम्, उत्तरक्षेत्रे कुल्हुधुफुशी-नगरे अनेकेषां गृहाणां क्षतिः अभवत् । द्वीपसमूहस्य राष्ट्रिय-आपद्-व्यवस्थापन-प्राधिकरणम् अवदत् यत् जलप्लावनेन न्यूनातिन्यूनं नवषष्टि गृहाणि क्षतिग्रस्तानि अभवन् इति। इतः पूर्वं, स्थानीय-ऋतु-विज्ञान -विभागेन, हुल्हङ्गु-मान्सून् इति नाम्ना ख्यातस्य सक्रियस्य दक्षिण-मान्सून् इत्यस्य प्रभावम् अधिकृत्य नारङ्ग-वार्णिकी-सूचना दत्ता आसीत्। कुल्हुधुफुशी-नगरपरिषदः अधिकारिणः स्थानीयसञ्चारमाध्यमान् सूचितवन्तः यत् जलप्लावनेन सम्पूर्णे द्वीपे प्रभावः जातः, पञ्चषष्टि प्रतिशतं गृहाणि च क्षतिग्रस्तानि अभवन् इति। गम्भीररूपेण प्रभावितेभ्यः गृहेभ्यः जनाः निष्कासिताः, ते अस्थायिषु आश्रयस्थानेषु निवसन्ति स्म, अपरत्र मार्गेषु जलनिष्कासनाय पम्प्स् इति जलनिष्कासन-यन्त्राणि उपयुज्यन्ते स्म। गतमासस्य आरम्भे 'माले' इति राजधान्यां प्रचण्डवृष्ट्या दैनिकजीवने बाधा जनिता आसीत् ।

।। इति वार्ताः।।